तत्र चैतानि चूर्णानि समो विल्वमितान्यता ।
काकुची चाथ दद्रुघ्नः पिचुमर्द्दो हरीतकी ।
धात्री रात्रिश्च मञ्जिष्ठा मरिचं नागरं कणा ।
यवानी सैन्धवं मुस्तं त्वगेला नागकेशरम् ।
पर्पटः पद्मकं वालमुशीरं चन्दनं तथा ।
गोक्षुरस्य च बीजानि कर्च्चूरो रक्तचन्दनम् ।
पृथक् पलार्द्धमानानां चूर्णमेषामिह क्षिपेत् ।
पलमात्रमिदं प्रातः समश्नीयाज्जलेन हि ।
नाशयेदवलेहोऽयं कुष्ठानि निखिलान्यपि ।
वातरक्तानि सर्व्वाणि सर्व्वाण्यर्शांसि सेवितः ।
व्यायाममातपं वह्निमम्लं मांसं दधि स्त्रियम् ।
तैलाभ्यङ्गं तथाभ्यानं नरो भल्लातके त्यजेत् ।”
इति अमृतभल्लातकावलेहः । * ।
“निम्बं गोपाख्या कट्वी आयन्ती त्रिफला घनम् ।
पर्पटावल्गुजानन्ता वचा खदिरचन्दनम् ।
पाठा शुण्ठी शटी भार्गी वासा भूनिम्बवत्सकम् ।
श्यामेन्द्रवारुणी मूर्व्वा विडङ्गेन्द्रयवानलम् ।
हस्तिपर्णोऽमृता शृङ्का पटोलरजनीद्वयम् ।
कथारग्वधसप्ताह्वशाबेचीवटाफलम् ।
मञ्जिष्ठा लाङ्गली रास्ना नक्तमालं पुनर्नवा ।
दन्ती विजयसारश्च भृङ्गराजकुरण्टकम् ।
अङ्कोठकश्च शाखोटं द्विपलांशं पृथक् पृथक् ।
एतैश्वापानि सर्व्वाणि जलद्रोणे पचेच्छनैः ।
अष्टमांशावशेषन्तु कषायमवतारयेत् ।
विधाय वाससा पूतं स्थापयेद्भाजने दृढे ।
भल्लातकसहस्राणि छिन्ना जीर्णमयेऽम्भसि ।
पचेदष्टावशेषन्तु कषायमवतारयेत् ।
तच्च वस्त्रेण संशोध्य द्वौ कषायौ विमिश्रयेत् ।
गुडस्य च तुलां दत्त्वा लेहवत् साधु साधयेत् ।
भल्लातकसहस्राणि तत्र बीजानि निःक्षिपेत् ।
त्रिकटु त्रिफला मुस्तं विडङ्गं चक्रकं तथा ।
चन्दनं सैन्धवं कुष्ठं दीप्यकश्च पलं पलम् ।
सौगन्ध्यर्थं क्षिपेत्तत्र चातुर्जातं पलं पृथक् ।
महाभल्लातको ह्येष महादेवेन भाषितः ।
प्राणिनां हितकामाय जयेच्छीघ्रं प्रयोजितः ।
श्वित्रमौडुम्बरं दद्रुमृष्यजिह्वं सकाकणम् ।
पुण्डरीकञ्च चर्म्माख्यं विस्फोटं रक्तमण्डलम् ।
कण्डूं कपालकं कुष्ठं पामाञ्च विपादिकाम् ।
वातरक्तं चर्षांसि पाण्डुरोगं प्रशमीन् ।
रक्तपित्तमुदावर्त्तकासश्वासं भगन्दरम् ।
सदाभ्यासेन पलितमामवातं सुदुस्तरम् ।
निर्येनचस्तु कथितो विहाराहारमैथुनैः ।
कुरुते परमां कान्तिं प्रदीप्तं जठरानलम् ।
अनुपानं प्रयोक्तव्यं क्षिप्रानीयं पयोऽथवा ।
भोजने तु सदा त्याज्यमुष्णमम्लं विशेषतः ।”
गोपा चेत साउ इति लोके । यत आह
निघण्टुः ।
“सारिवा सारदा स्फोटा गोपकन्या प्रता-
निका ।”
तहाचको गोपीशब्दश्च यत आह । गोपी
श्यामा सारिवा स्यादनन्तोत्पलसारिवा इत्य-
मरः । गोपाङ्गना गोपवल्ली लताह्वा काष्ठ-
सारिवेति मदनपालः । अरुष्का अतीसूः ।
अवल्गुजः सोमराजी । अनन्ता दुरालभा ।
चन्दनं श्वेतम् । भार्ग्यां अलाभे कण्टकारी-
मूलम् । श्यामा लघ्या साउ । हस्तिकर्णः
हयिकच । शृङ्का वका इति । सप्ताह्वः छति-
मन् । शाकवेत्रः जलवेतसः । उष्टापलं आरक्त-
गुञ्जाफलम् । कुरण्टकः कटसरैया । दीप्यकः
इति यवानी । महाभल्लातकः ।
“मञ्जिष्ठा त्रिफला तिक्ता वचा दारु निशा-
मृता ।
निम्बश्चैषां कृतः क्वाथः सर्व्वकुष्ठानि नाशयेत् ।”
इति लघुमञ्जिष्ठादिक्वाथः । * ।
“मञ्जिष्ठा वाकुची चक्रमर्द्दश्च पिचुमर्द्दकम् ।
हरीतकी हरिद्रा च धात्री वासा शतावरी ।
बला नागबला यष्टीमधुकं क्षुरकोऽपि च ।
पटोलस्य लतोशीरं गुडूची रक्तचन्दनम् ।
मञ्जिष्ठादिरयं क्वाथः कुष्ठानां नाशनः परः ।
वातरक्तस्य संहर्त्ता कण्डूमण्डलखण्डनः ।”
इति मध्यममञ्जिष्ठादिक्वाथः । * ।
“मञ्जिष्ठा कुटजामृता घनवचा शुण्ठी हरिद्रा
द्वयं
क्षुद्रारिष्टपटोलकुष्ठकटुका भार्गी विडङ्गा-
ग्निकम् ।
मूर्व्वा दारु कलिङ्गभृङ्गमगधा त्रायन्ति पाठा
वरी
गायत्री त्रिफला किरातकमहानिम्बा सना-
रग्वधम् ।
श्यामा वल्गुजचन्दनं वरुणकं दन्ती कणा
चोढ़कं
वासा पर्पटसारिवा प्रतिविषानन्ता विशाला
जलम् ।
मञ्जिष्ठादिरयं कषायविधिना नित्यं पुमान् यः
पिबेत्
त्वग्दोषा क्षयिरेव यान्ति विलयं कुष्ठानि
चाष्टादश ।
नाशं गच्छति वातरक्तमखिलं नश्यन्ति रक्ता-
मया
वीसर्पश्चपि शून्यता नयनजा रोगाः प्रशा-
म्यन्ति च ।”
अरिष्टः निम्बः । कलिङ्गः इन्द्रयवः । भृङ्गं
भृङ्गरा । वरी शतावरी । गायत्री खदिरः ।
असनः विजयसारः । श्यामा प्रियङ्गुः ।
चन्दनमत्र रक्तं ग्राह्यम् । सारिवा साउ ।
अनन्ता दुरालभा । विशाला इन्द्रवारुणी
इति । जलं नेत्रवाला । इति महामञ्जिष्ठादिक्वाथः ।
“मरिचं त्रिवृता मुस्ता हरितालं मनःशिला ।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम् ।
विशाला करवीरश्च चीरमर्कसमुद्भवम् ।
गोमयस्य रसं कुर्य्यात् प्रत्येकं कर्षसम्मितम् ।
विषस्यार्द्धपलं देयं तैलं प्रस्थमितं कटु ।
पचेच्चतुर्गुणे नीरे गोमूत्रे द्विगुणे तथा ।
मरिचाद्यमिदं तैलमभ्यङ्गात् कुष्ठनाशनम् ।
एतस्याभ्यङ्गतः श्वित्रं विवर्णं तत्त्वचाङ्गयेत् ।
तैलमेतज्जयेत् कण्डूं पामां सिध्मं विचर्च्चिकाम् ।
पुण्डरीकं तथा दद्रुं शून्यतां नित्यसेविनाम् ।”
इति लघुमरिचाद्यं तैलम् । * ।
“मरिचं त्रिवृता दन्ती चीरमार्कं शकृद्रसः ।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम् ।
विशाला करवीरश्च हरितालं मनःशिला ।
चित्रकं लाङ्गली मुस्ता विडङ्गं चक्रमर्द्दकः ।
शिरीषः कुटजो निम्बः सप्तपर्णोऽमृता स्नुही ।
सम्पाको नक्तमालश्च खदिरो वाकुची वचा ।
ज्योतिष्मती च पलिका विषं द्विपलिकं भवेत् ।
आढ़कं कटुतैलस्य गोमूत्रञ्च चतुर्गुणम् ।
मृत्पात्रे लोहपात्रे च शनैर्मृद्वग्निना पचेत् ।
मरिचाद्यमिदं तैलं महन्मुनिभिरीरितम् ।
भिषगेतेन तैलेन म्रक्षयेत् कौष्ठिकान् व्रणान् ।
पामाविचर्च्चिकादद्रुकण्डूविस्फोटकानि च ।
वलयः पलितं च्छाया नीलं व्यङ्गं तथैव च ।
अभ्यङ्गेन प्रणश्यन्ति सौकुमार्यञ्च जायते ।
प्रथमे वयसि स्त्रीणां यासां नस्यं प्रदीयते
तासामपि जरां प्राप्य न स्यातां श्लथितौ
स्तनौ ।
वलीवर्द्दस्तुरङ्गो वा गजो वा वायुपीड़ितः ।
त्रिभिरभ्यञ्जनै रम्यं भवेन्मारुतविक्रमः ।”
ज्योतिष्मती मालकङ्गणीति लोके । इति महा-
मरिचादितैलम् । * ।
“तालकस्य तु पत्राणि यस्य सन्ति पृथक् पृथक् ।
अभ्रकस्येव तद्ग्राह्यं हरितालं चिकित्सकैः ।
पुनर्नवायाः स्वरसे तालकं तद्विमर्द्दयेत् ।
दिनमेकं ततस्तस्मिन् घनत्वं गमिते सति ।
कुर्व्वीत चक्रिकां तान्तु शोषयेत् सम्यगातपे ।
पुनर्नवासमस्ताङ्गचारैः स्थालीं गलावधि ।
पूरयेच्च ततः चारं दृढ़येत् पीड़नेन हि ।
चारस्योपरि तां दद्यात् तालकस्य तु चक्रि-
काम् ।
तत आच्छादनं दत्त्वा मुद्रां कृत्वा विशोषयेत् ।
स्थालीं चुल्ल्यां निधायाग्निममन्दं ज्वालयेद्-
भिषक् ।
निरन्तरमहोरात्रं पञ्चकं तेन सिध्यति ।
स्वाङ्गशीतं समुत्तार्य्य गृह्णीयाद्रससुत्तमम् ।
तालकेश्वरनामायमुक्तो गुञ्जामितो रसः ।
गुड़ूच्यादिकषायेण गदानेतान् विनाशयेत् ।
अष्टादशापि कुष्ठानि वातरक्तं तथोल्बणम् ।
फिरङ्गदेशजं रोगं दुस्तरं च व्यपोहति ।
एतद्भेषजसेवी तु लवणान्नं विवर्ज्जयेत् ।
तथा कटुरसं वह्निमातपं दूरतस्त्यजेत् ।
लवणं यः परित्यक्तुं न शक्नोति कथञ्चन ।
स तु सैन्धवमश्नीयात् मधुरोपरसो हि सः ।”
इति तालकेश्वरो रसः । * ।
“तालताप्यशिलासूतं टङ्कणं सिन्धुसंयुतम् ।
गन्धार्कौ द्विगुणौ सूताज्जम्बीराद्भिः प्रमर्द्दयेत् ।
यहं पुटितं धोढ़ा भूधरे सकलं त्विदम् ।
षट्पदं द्विपलं ताम्रं लोहभस्म चतुष्पलम् ।